
# 2 दीर्घः कः? वर्तुलं किम् ?

0124CH02

## परितः पश्यन्तु !

विद्या-भगिनी सर्वान् बालकान् वर्तुलाकारे उपवेष्टुं अवदत्।





not to be republished


बालकान् कक्षायाम् एतां क्रीडां क्रीडितुं वदन्तु। बालकाः एकस्य दीर्घवस्तुनः एकस्य वर्तुलवस्तुनः च नाम वदिष्यन्ति। प्रत्येकं वारं ते नूतनवस्तुनः नाम वदेयुः, पुनरावृत्तिः परिहर्तव्या। दीर्घवस्तूनां सन्दर्भे बालकाः तेषांवस्तूनाम् एकस्मिन् आयामे ध्यानं दातुं शक्नुवन्ति। यथा केचन बालकाः चषकं दीर्घम् इति वदन्ति , परम् अन्ये वर्तुलम् इति। त्तार्किकरूपेण पक्षद्वयमपि विचारणीयम्। बालकाः स्वस्य वर्गीकरणस्य तर्कम् उपस्थापयितुं शक्नुवन्ति।



## चिन्तयन्तु कुर्वन्तु च



क. वर्तुलवस्तूनि ◯ इत्यत्र, दीर्घवस्तूनि ▭ इत्यत्र च चित्रयन्तु।










© NCERT not to be republished


ख. आकारेण समानानां वस्तूनां मेलनं कुर्वन्तु।














ग. कन्दुकेन सदृशे वस्तुनि ✓ चिह्नं कुर्वन्तु  ।




© NCERT not to be republished


घ. शिरोवस्त्रेण सदृशे वस्तुनि ✓ चिह्नं कुर्वन्तु ।



ङ. काचेन सदृशे वस्तुनि ✓ चिह्नं कुर्वन्तु ।



च. अग्निपेटिकया सदृशे वस्तुनि ✓ चिह्नं कुर्वन्तु ।






## एहि करवाम


भवतः परिवेशे उपलभ्यमानानां विभिन्नानां वस्तूनां साहाय्येन गृहं, क्रीडनकं, गोपुरं, रोबोटयन्त्रं, लोकयानम् अथवा यत्किमपि भवतः रोचते तत् निर्मान्तु। एतदर्थं भवन्तः पुस्तिकानां, पुस्तकानाम्, अङ्कनीपेटिकानां जलकूपीनाम्, अपशिष्टानां पुरातनानां वा पेटिकानां, जन्मदिनस्य शिरोवस्त्राणां वा उपयोगं कर्तुं शक्नुवन्ति।

बालकान् चतुर्षु समूहेषु विभज्यताम्। प्रत्येकं समूहाय एकम् आकारं दत्त्वा बालकान् तेन आकारेण सदृशम् उपयुक्तम् अपशिष्टं वा वस्तु आनेतुं वदन्तु । कक्षायां सर्वाणि संगृहीतवस्तूनि प्रदर्शयन्तु। बालकाः स्ववस्तूनि अन्योऽन्यं विनिमयं कुर्युः, पुनश्च तानि विशेषवस्तूनि किमर्थं चितानि इति कारणेन सहितं वदेयुः।



© NCERT not to be republished

# बुद्धिमती पितामही



एकदा कश्चित् मेष-शावकः स्वपितामहीं मेलितुं गच्छति स्म।

तदानीम् एकः वृकः तं मेषशावकं दृष्टवान्। सः वृकः तं मेषशावकं ग्रहीतुम् इच्छति स्म।




सः मेषशावकः वृकस्य सर्वमपि वृत्तान्तं पितामहीम् अवदत्।
पितामही एकम् उपायं विचिन्त्य मेषशावकम् एकस्मिन् *मृदङ्गे* संस्थाप्य तस्य गृहं प्रति आवर्तितवती।




कथाम् उच्चैः पठन्तु, बालकान् तस्याः अभिनयं कर्तुं वदन्तु।




© NCERT not to be republished

*मृदङ्गः* अतीव वेगेन आवर्तयत्, वृकः मृदङ्गस्य पृष्ठतः धावितुं आरब्धवान्।



वृकः मेषशावकं ग्रहीतुं न शक्तवान्। सः मेषशावकः सक्षेमं गृहं प्राप्नोत्।






मृदङ्गः किमर्थम् आवर्तितः? इति बालाः तर्कयन्तु। *मृदङ्गस्य* आकारविषये, अरण्यात् मेषशावकस्य गृहपर्यन्तं विद्यमानस्य असमतलस्य भूभागस्य विषये च चर्चां कुर्वन्तु।



© NCERT not to be republished



## एहि क्रीडाम

चित्रे बालकाः घोटीफलकं (Carrom) क्रीडन्ति। भवन्तः अपि क्रीडितुं द्रष्टुं च शक्नुवन्ति यत् कोणं प्राप्तुं प्रहारकः (स्ट्राइकर) कथं स्खलति इति ।




क. अधोलिखिते चित्रे ◯ दत्तानाम् आवर्तनयोग्यानां वस्तूनां कृते **'आ'** इति तथैव स्खलनयोग्यानां वस्तूनां कृते **'स्ख'** इति लिखन्तु ।




ख. स्वस्य परिवेशात् विभिन्नानि वस्तूनि सङ्गृह्य तानि किम् आवर्तयन्ति अथवा स्खलन्ति इति पश्यन्तु

ग. किं भवन्तः उभयात्मकानि (आवर्तनयोग्यानि स्खलनयोग्यानि च) वस्तूनि दृष्टवन्तः? यदि आम्, तर्हि कक्षायां चर्चां कुर्वन्तु ।

बालकान् स्वगृहे विद्यालये वा उपलभ्यमानानां विविधवस्तूनां विषये पृच्छन्तु, यानि आवर्तयन्ति स्खलन्ति च। वस्तूनां काः विशेषताः समतले आवर्तने स्खलने वा तेषां साहाय्यं कुर्वन्ति इति विषये अपि चर्चां कुर्वन्तु।





© NCERT not to be republished



## चिन्तयन्तु कुर्वन्तु च

निम्नलिखितेषु कानि वस्तूनि आवर्तनात्मकानि, स्खलनात्मकानि, उभयात्मकानि इति जानन्तु। X ✓ वा स्थापयन्तु

| वस्तु | आवर्तनात्मकानि | स्खलनात्मकानि | उभयात्मकानि |
|---|---|---|---|
|  | | | |
|  | | | |
|  | | | |
|  | | | |
|  | | | |
|  | | | |
|  | | | |
|  | | | |

© NCERT not to be republished



## परियोजना-कार्यम्

क. पादरक्षपेटिका, रिक्तभोजनपेटिका, फलपेटिका इत्याद्याः स्थूलकार्पासस्य (cardboard) पेटिकाः संगृह्णन्तु। पेटिकायाः पुरतः एकत्र छिद्रं कृत्वा नेत्रद्वयं, मुखं, नासिकां च चित्रयतु, मातापित्रोः शिक्षकस्य वा साहाय्येन पुत्तलिकां निर्माय तया सह क्रीडन्तु। स्वस्य रोचककथासम्बद्धाः पुत्तलिकाः निर्माय, स्वकक्षायां पुत्तलिकानां प्रदर्शनीम् आयोजयन्तु।

ख. विभिन्नवस्तूनि उपयुज्य गोपुराणि निर्मान्तु। कीदृक्आकृतिमयानि वस्तूनि दीर्घाणां स्थिराणां च गोपुराणां निर्माणे साहाय्यं कुर्वन्ति इति जानन्तु।

ग. मृत्तिकाम् उपयुज्य विभिन्नाः आकृतीः वस्तूनि च निर्मान्तु।